# Audumbara Paduka Stotram

# औदुम्बरपादुकास्तोत्रम्

## Document Information

Text title : Audumbara Paduka Stotram

File name : audumbarapAdukAstotram.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# औदुम्बरपादुकास्तोत्रम्

वन्दे वाङ्मनसातीतं निर्गुणं सगुणं गुरुम् ।
दत्तमात्रेयमानन्दकन्दं भक्तेष्टपूरकम् ॥ १॥

नमामि सततं दत्तमौदुम्बरनिवासिनम् ।
यतीन्द्ररूपं च सदा निजानन्दप्रबोधनम् ॥ २॥

कृष्णा यदग्रे भुवनेशानी विद्यानिधिस्तथा ।
औदुम्बराः कल्पवृक्षाः सर्वतः सुखदाः सदा ॥ ३॥

भक्तवृन्दान्दर्शनतः पुरुषार्थचतुष्टयम् ।
ददाति भगवान् भूमा सच्चिदानन्दविग्रहः ॥ ४॥

जागर्ति गुप्तरूपेण गोप्ता ध्यानसमाधितः ।
ब्रह्मवृन्दं ब्रह्मसुखं ददाति समदृष्टितः ॥ ५॥

कृष्णा तृष्णाहरा यत्र सुखदा भुवनेश्वरी ।
यत्र मोक्षदराङ्दत्तपादुका तां नमाम्यहम् ॥ ६॥

पादुकारूपियतिराण्नरसिंहसरस्वती ।
राजते राजराजश्रीदत्तश्रीपादवल्लभः ॥ ७॥

नमामि गुरुमूर्तें तं तापत्रयहरं हरिम् ।
आनन्दमयमात्मानं नवभक्त्या सुखप्रदम् ॥ ८॥

करवीरस्थविदुषमूढपुत्रं विनिन्दितम् ।
छिन्नजिह्वं बुधं चक्रे तद्वन्मयि कृपां कुरु ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं औदुम्बरपादुकास्तोत्रं सम्पूर्णम् ।

*Audumbara Paduka Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*